# ॥ देवीवैभवाश्चर्याष्टोत्तरशतदिव्यनामावली ॥

..
devIvaibhavAshcharyAShTottarashatadivyanAmAvaliH
..

sanskritdocuments.org

August 20, 2017

# .. devIvaibhavAshcharyAShTottarashatadivyanAmAvaliH ..

# ॥ देवीवैभवाश्चर्याष्टोत्तरशतदिव्यनामावली ॥

## Sanskrit Document Information

Text title : devIvaibhavAshcharyAShTottarashatadivyanAmAvaliH

File name : devIvaibhavAshcharya108nAma.itx

Category : aShTottarashatanAmAvalI, devii, dashamahAvidyA, nAmAvalI

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : K S Ramachandran ramachandran_ksr at yahoo.ca

Proofread by : K S Ramachandran ramachandran_ksr at yahoo.ca

Latest update : December 12, 2012

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ देवीवैभवाश्चर्याष्टोत्तरशतदिव्यनामावली ॥

ॐ ऐं ह्रीं श्रीं ।
ॐ परमानन्दलहर्यै नमः ।
ॐ परचैतन्यदीपिकायै नमः ।
ॐ स्वयंप्रकाशकिरणायै नमः ।
ॐ नित्यवैभवशालिन्यै नमः ।
ॐ विशुद्धकेवलाखण्डसत्यकालात्मरूपिण्यै नमः । ५
ॐ आदिमध्यान्तरहितायै नमः ।
ॐ महामायाविलासिन्यै नमः ।
ॐ गुणत्रयपरिच्छेत्र्यै नमः ।
ॐ सर्वतत्त्वप्रकाशिन्यै नमः ।
ॐ स्त्रीपुंसभावरसिकायै नमः । १०
ॐ जगत्सर्गादिलंपटायै नमः ।
ॐ अशेषनामरूपादिभेदच्छेदरविप्रभायै नमः ।
ॐ अनादिवासनारूपायै नमः ।
ॐ वासनोद्यत्प्रपञ्चिकायै नमः ।
ॐ प्रपञ्चोपशमप्रौढायै नमः । १५
ॐ चराचरजगन्मय्यै नमः ।
ॐ समस्तजगदाधारायै नमः ।
ॐ सर्वसञ्जीवनोत्सुकायै नमः ।
ॐ भक्तचेतोमयानन्तस्वार्थवैभवविभ्रमायै नमः ।
ॐ सर्वाकर्षणवश्यादिसर्वकर्मदुरन्धरायै नमः । २०
ॐ विज्ञानपरमानन्दविद्यायै नमः ।
ॐ सन्तानसिद्धिदायै नमः ।
ॐ आयुरारोग्यसौभाग्यबलश्रीकीर्तिभाग्यदायै नमः ।
ॐ धनधान्यमणीवस्त्रभूषालेपनमाल्यदायै नमः ।
ॐ गृहग्राममहाराज्यसांराज्यसुखदायिन्यै नमः । २५
ॐ सप्ताङ्गशक्तिसम्पूर्णसार्वभौमफलप्रदायै नमः ।
ॐ ब्रह्मविष्णुशिवेन्द्रादिपदविश्राणनक्षमायै नमः ।
ॐ भुक्तिमुक्तिमहाभक्तिविरक्त्यद्वैतदायिन्यै नमः ।

ॐ निग्रहानुग्रहाध्यक्षायै नमः ।
ॐ ज्ञाननिर्द्वैतदायिन्यै नमः । ३०
ॐ परकायप्रवेशादियोगसिद्धिप्रदायिनी नमः ।
ॐ शिष्टसञ्जीवनप्रौढायै नमः ।
ॐ दुष्टसंहारसिद्धिदायै नमः ।
ॐ लीलाविनिर्मितानेककोटिब्रह्माण्डमण्डलायै नमः ।
ॐ एकस्मै नमः । ३५
ॐ अनेकात्मिकायै नमः ।
ॐ नानारूपिण्यै नमः ।
ॐ अर्धाङ्गनेश्वर्यै नमः ।
ॐ शिवशक्तिमय्यै नमः ।
ॐ नित्यशृङ्गारैकरसप्रियायै नमः । ४०
ॐ तुष्टायै नमः ।
ॐ पुष्टायै नमः ।
ॐ अपरिच्छिन्नायै नमः ।
ॐ नित्ययौवनमोहिन्यै नमः ।
ॐ समस्तदेवतारूपायै नमः । ४५
ॐ सर्वदेवाधिदेवतायै नमः ।
ॐ देवर्षिपितृसिद्धादियोगिनीभैरवात्मिकायै नमः ।
ॐ निधिसिद्धिमणीमुद्रायै नमः ।
ॐ शस्त्रास्त्रायुधभासुरायै नमः ।
ॐ छत्रचामरवादित्रपताकाव्यजनाञ्चितायै नमः । ५०
ॐ हस्ताश्वरथपादातामात्यसेनासुसेवितायै नमः ।
ॐ पुरोहितकुलाचार्यगुरुशिष्यादिसेवितायै नमः ।
ॐ सुधासमुद्रमध्योद्यत्सुरद्रुमनिवासिन्यै नमः ।
ॐ मणिद्वीपान्तरप्रोद्यत्कदंबवनवासिन्यै नमः ।
ॐ चिन्तामणिगृहान्तस्थायै नमः । ५५
ॐ मणिमण्डपमध्यगायै नमः ।
ॐ रत्नसिंहासनप्रोद्यत्शिवमञ्चाधिशायिन्यै नमः ।
ॐ सदाशिवमहालिङ्गमूलसंघट्टयोनिकायै नमः ।
ॐ अन्योन्यालिङ्गसंघर्षकन्ण्डूसंक्षुब्धमानसायै नमः ।

ॐ कलोद्यद्बिन्दुकालिन्यातुर्यनादपरंपरायै नमः । ६०
ॐ नादान्तानन्दसन्दोहस्वयंव्यक्तवचोऽमृतायै नमः ।
ॐ कामराजमहातन्त्ररहस्याचारदक्षिणायै नमः ।
ॐ मकारपञ्चकोद्भूतप्रौढान्तोल्लाससुन्दर्यै नमः ।
ॐ श्रीचक्रराजनिलयायै नमः ।
ॐ श्रीविद्यामन्त्रविग्रहायै नमः । ६५
ॐ अखण्डसच्चिदानन्दशिवशक्त्यैकरूपिण्यै नमः ।
ॐ त्रिपुरायै नमः ।
ॐ त्रिपुरेशान्यै नमः ।
ॐ महात्रिपुरसुन्दर्यै नमः ।
ॐ त्रिपुरावासरसिकायै नमः । ७०
ॐ त्रिपुराश्रीस्वरूपिण्यै नमः ।
ॐ महापद्मवनान्तस्थायै नमः ।
ॐ श्रीमत्त्रिपुरमालिन्यै नमः ।
ॐ महात्रिपुरसिद्धाम्बायै नमः ।
ॐ श्रीमहात्रिपुराम्बिकायै नमः । ७५
ॐ नवचक्रक्रमादेव्यै नमः ।
ॐ महात्रिपुरभैरव्यै नमः ।
ॐ श्रीमात्रे नमः ।
ॐ ललितायै नमः ।
ॐ बालायै नमः । ८०
ॐ राजराजेश्वर्यै नमः ।
ॐ शिवायै नमः ।
ॐ उत्पत्तिस्थितिसंहारक्रमचक्रनिवासिन्यै नमः ।
ॐ अर्धमेर्वात्मचक्रस्थायै नमः ।
ॐ सर्वलोकमहेश्वर्यै नमः । ८५
ॐ वल्मीकपुरमध्यस्थायै नमः ।
ॐ जम्बूवननिवासिन्यै नमः ।
ॐ अरुणाचलशृङ्गस्थायै नमः ।
ॐ व्याघ्रालयनिवासिन्यै नमः ।
ॐ श्रीकालहस्तिनिलयायै नमः । ९०

ॐ काशीपुरनिवासिन्यै नमः ।
ॐ श्रीमत्कैलासनिलयायै नमः ।
ॐ द्वादशान्तमहेश्वर्यै नमः ।
ॐ श्रीषोडशान्तमध्यस्थायै नमः ।
ॐ सर्ववेदान्तलक्षितायै नमः । ९५
ॐ श्रुतिस्मृतिपुराणेतिहासागमकलेश्वर्यै नमः ।
ॐ भूतभौतिकतन्मात्रदेवताप्राणहृन्मय्यै नमः ।
ॐ जीवेश्वरब्रह्मरूपायै नमः ।
ॐ श्रीगुणाढ्यायै नमः ।
ॐ गुणात्मिकायै नमः । १००
ॐ अवस्थात्रयनिर्मुक्तायै नमः ।
ॐ वाग्रमोमामहीमय्यै नमः ।
ॐ गायत्रीभुवनेशानीदुर्गाकाळ्यादिरूपिण्यै नमः ।
ॐ मत्स्यकूर्मवराहादिनानारूपविलासिन्यै नमः ।
ॐ महायोगीश्वराराध्यायै नमः । १०५
ॐ महावीरवरप्रदायै नमः ।
ॐ सिद्धेश्वरकुलाराध्यायै नमः ।
ॐ श्रीमच्चरणवैभवायै नमः । १०८
श्रीं ह्रीं ऐं ॐ ।

Encoded and proofread by K S Ramachandran
ramachandran_ksr at yahoo.ca
18 mayAnanda
66 shaktyaikya

.. devIvaibhavAshcharyAShTottarashatadivyanAmAvaliH ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*